# ॥ वाल्मीकि रामायण॥

## ७ उत्तरकाण्ड

### अध्याय ७७

तथा वृत्रवधं सर्वमखिलेन स लक्ष्मणः ।
कथयित्वा नरश्रेष्ठः कथाशेषमुपाक्रमत् ॥ १॥

ततो हते महावीर्ये वृत्रे देवभयङ्करे ।
ब्रह्महत्यावृतः शक्रः संज्ञां लेभे न वृत्रहा ॥ २॥

सोऽन्तमाश्रित्य लोकानां नष्टसंज्ञो विचेतनः ।
कालं तत्रावसत्कं चिद्वेष्टमानो यथोरगः ॥ ३॥

अथ नष्टे सहस्राक्षे उद्विग्नमभवज्जगत् ।
भूमिश्च ध्वस्तसङ्काशा निःस्नेहा शुष्ककानना ॥ ४॥

निःस्रोतसश्चाम्बुवाहा ह्रदाश्च सरितस्तथा ।
सङ्क्षोभश्चैव सत्त्वानामनावृष्टिकृतोऽभवत् ॥ ५॥

क्षीयमाणे तु लोकेऽस्मिन्सम्भ्रान्तमनसः सुराः ।
यदुक्तं विष्णुना पूर्वं तं यज्ञं समुपानयन् ॥ ६॥

ततः सर्वे सुरगणाः सोपाध्यायाः सहर्षिभिः ।
तं देशं सहिता जग्मुर्यत्रेन्द्रो भयमोहितः ॥ ७॥

ते तु दृष्ट्वा सहस्राक्षं मोहितं ब्रह्महत्यया ।
तं पुरस्कृत्य देवेशमश्वमेधं प्रचक्रिरे ॥ ८॥

ततोऽश्वमेधः सुमहान्महेन्द्रस्य महात्मनः ।
ववृधे ब्रह्महत्यायाः पावनार्थं नरेश्वर ॥ ९॥

ततो यज्ञसमाप्तौ तु ब्रह्महत्या महात्मनः ।
अभिगम्याब्रवीद्वाक्यं क्व मे स्थानं विधास्यथ ॥ १०॥

ते तामूचुस्ततो देवास्तुष्टाः प्रीतिसमन्विताः ।
चतुर्धा विभजात्मानमात्मनैव दुरासदे ॥ ११॥

देवानां भाषितं श्रुत्वा ब्रह्महत्या महात्मनाम् ।
संनिधौ स्थानमन्यत्र वरयामास दुर्वसा ॥ १२॥

एकेनांशेन वत्स्यामि पूर्णोदासु नदीषु वै ।
द्वितीयेन तु वृक्षेषु सत्यमेतद्ब्रवीमि वः ॥ १३॥

योऽयमंशस्तृतीयो मे स्त्रीषु यौवनशालिषु ।
त्रिरात्रं दर्पपर्णासु वसिष्ये दर्पघातिनी ॥ १४॥

हन्तारो ब्राह्मणान्ये तु प्रेक्षापूर्वमदूषकान् ।
तांश्चतुर्थेन भागेन संश्रयिष्ये सुरर्षभाः ॥ १५॥

प्रत्यूचुस्तां ततो देवा यथा वदसि दुर्वसे ।
तथा भवतु तत्सर्वं साधयस्व यथेप्सितम् ॥ १६॥

ततः प्रीत्यान्विता देवाः सहस्राक्षं ववन्दिरे ।
विज्वरः पूतपाप्मा च वासवः समपद्यत ॥ १७॥

प्रशान्तं च जगत्सर्वं सहस्राक्षे प्रतिष्ठते ।
यज्ञं चाद्भुतसङ्काशं तदा शक्रोऽभ्यपूजयत् ॥ १८॥

ईदृशो ह्यश्वमेधस्य प्रभावो रघुनन्दन ।
यजस्व सुमहाभाग हयमेधेन पार्थिव ॥ १९॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 26, 1998; Send corrections to sanskrit@cheerful.com